शम्भु + सुँ $^{S1/1}$

शम्भो + स् 7.3.108 ह्रस्वस्य गुणः। ~ सम्बुद्धौ

Without the adjective विहित, this सुँ would have been treated like णित्, which is अनिष्ट.

[LSK] गौः $^{1/1}$ । गावौ $^{1/2}$ । गावः $^{1/3}$॥

गो + सुँ $^{1/1}$

गो + स् 7.1.90 गोतो णित् । ~ सर्वनामस्थानम्

गौ + स् 7.2.115 अचो ञ्णिति । ~ वृद्धिः, with 1.1.52 अलोऽन्त्यस्य।

गौः 8.2.66, 8.3.15

गो + औ $^{1/2}$

गो + औ 7.1.90 गोतो णित् । ~ सर्वनामस्थानम्

गौ + औ 7.2.115 अचो ञ्णिति । ~ वृद्धिः

गावौ 6.1.78 एचोऽयवायावः ।

The next sūtra is अपवाद् to 7.1.90 गोतो णित्।.

## [विधिसूत्रम्] 6.1.93 औतोऽम्शसोः । ~ अचि पूर्वपरयोः एकः संहितायाम्

When ओ is followed by अम् or शस्, आ is the एकादेश.




आ $^{1/1}$ ओतः $^{5/1}$ अम्शसोः $^{6/2}$ । ~ अचि $^{7/1}$ पूर्वपरयोः $^{6/2}$ एकः $^{1/1}$ संहितायाम् $^{7/1}$

3 words in the सूत्र; 4 words as अनुवृत्ति

- आ 1/1 – This is आदेश.
- ओतः 5/1 – प्रातिपदिक is ओत्; in पूर्वपञ्चमी. तपरकरण is for कालनियम.
- अम्शसोः 6/2 – अम् च शस् च अम्शसौ (ID), तयोः।; 2/1 and 2/3 विभक्तिs; in सम्बन्धे षष्ठी to अचि.
- अचि 7/1 – प्रत्याहारः अच्; in परसप्तमी.
- पूर्वपरयोः 6/2 – in स्थानेयोगषष्ठी. Of पूर्व and पर.
- एकः 1/1 – One substitute.
- संहितायाम् 7/1 – In the topic of sandhi; in विषयसप्तमी.

[LSK] ओतः $^{5/1}$ अम्शसोः $^{6/2}$ अचि $^{7/1}$ आकारः $^{1/1}$ एकादेशः $^{1/1}$ ।

After ओ, when अच् of अम् or शस् follows, आ is the one substitute in the place of the two, ओ and अच्.

[LSK] गाम् $^{2/1}$ । गावौ $^{2/2}$ । गाः $^{2/3}$ ।

गो + अम् $^{2/1}$

ग् + आ + म्   6.1.93 औतोऽम्शसोः । ~ अचि पूर्वपरयोः एकः संहितायाम्

गाम्

गो + शस् $^{2/3}$

ग् + आ + स्   6.1.93 औतोऽम्शसोः । ~ अचि पूर्वपरयोः एकः संहितायाम्

गाः   8.2.66, 8.3.15

[LSK] गवा $^{3/1}$ । गवे $^{4/1}$ । गोः $^{5/1, 6/1}$ । इत्यादि $^{1/1}$ ॥

गो + टा $^{3/1}$

गव् + आ 6.1.78 एचोऽयवायावः ।

गवा

गो + ङे $^{4/1}$

गव् +ए 6.1.78 एचोऽयवायावः ।

गवा

गो + ङसिँ $^{5/1}$

गोस् 6.1.110 ङसिङसोश्च । ~ पूर्वः

गोः 8.2.66, 8.3.15

Declension of गो (ओ-पुं-1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | गौः 7.1.90, 7.2.115, 8.2.66, 8.3.15 | गावौ 7.1.90, 7.2.115, 6.1.78 | गावः 7.1.90, 7.2.115, 6.1.78, 8.2.66, 8.3.15 |
| S1 | same as above | same as above | same as above |
| 2 | गाम् 6.1.93 | same as above | गाः 6.1.93, 8.2.66, 8.3.15 |
| 3 | गवा 6.1.78 | गोभ्याम् | गोभिः 8.2.66, 8.3.15 |
| 4 | गवे 6.1.78 | same as above | गोभ्यः 8.2.66, 8.3.15 |
| 5 | गोः 6.1.110, 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | गवोः 6.1.78, 8.2.66, 8.3.15 | गवाम् 6.1.78 |
| 7 | गवि 6.1.78 | same as above | गोषु 8.3.59 |

## ऐ-कारान्त-पुँल्लिङ्गः (1) रै

रै (wealth) declines in the same manner in both masculine and feminine.

## [विधिसूत्रम्] 7.2.85 रायो हलि । ~ आ विभक्तौ

The last letter of रै becomes आ when हलादि विभक्ति follows.




रायः $^{6/1}$ हलि $^{7/1}$ । ~ आ $^{1/1}$ विभक्तौ $^{7/1}$

2 words in the सूत्र; 2 words as अनुवृत्ति

- रायः 6/1 – प्रातिपदिक is रै; in स्थानेयोगा षष्ठी.
- हलि 7/1 – This is adjective to विभक्तौ, thus तदादिविधि is applied to result in "हलादौ विभक्तौ परे".
- आ 1/1 – This is आदेश. From 7.2.84 अष्टन आ विभक्तौ।.
- विभक्तौ 7/1 – From 7.2.84 अष्टन आ विभक्तौ।; in परसप्तमी.

[LSK] अस्य $^{6/1}$ (रैशब्दस्य $^{6/1}$) आकर-आदेशः $^{1/1}$ हलि $^{7/1}$ विभक्तौ $^{7/1}$ ।

आ is the substitute in the place of the last letter of रै when हलादि विभक्ति follows.

[LSK] राः $^{1/1}$ ।

रै + सुँ $^{1/1}$

रा + स् 7.2.85 रायो हलि । ~ आ विभक्तौ

राः 8.2.66, 8.3.15

[LSK] रायौ $^{1/2}$ । रायः $^{1/3}$ ।

रै + औ $^{1/2}$

राय् + औ 6.1.78 एचोऽयवायावः ।

रै + जस् $^{1/3}$

राय् + अस् 6.1.78 एचोऽयवायावः ।

[LSK] राभ्याम् $^{3/2}$ इत्यादि $^{1/1}$ ॥

रै + भ्याम् $^{3/2}$

रा + भ्याम्    7.2.85 रायो हलि । ~ आ विभक्तौ

Declension of रै (ऐ-पुं-1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | राः 7.2.85, 8.2.66, 8.3.15 | रायौ 6.1.78 | रायः 6.1.78, 8.2.66, 8.3.15 |
| S1 | same as above | same as above | same as above |
| 2 | रायम् 6.1.78 | same as above | same as above |
| 3 | राया 6.1.78 | राभ्याम् 7.2.85 | राभिः 7.2.85, 8.2.66, 8.3.15 |
| 4 | राये 6.1.78 | same as above | राभ्यः 7.2.85, 8.2.66, 8.3.15 |
| 5 | रायः 6.1.78, 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | रायोः 6.1.78, 8.2.66, 8.3.15 | रायाम् 6.1.78 |
| 7 | रायि 6.1.78 | same as above | रासु |

## औ-कारान्त-पुँल्लिङ्गः (1) ग्लौ

ग्लायति इति ग्लौ (moon) ।

ग्लै हर्षक्षये (1P) to decline + डौ(उ० 2.65) ग्लानुदिभ्यां डौः ।

ग्ल् + औ (वा०) डित्वसामर्थ्याद् अभस्यापि टेर्लोपः।

ग्लौ 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

[LSK] ग्लौः 1/1 ।

ग्लौ + सुँ 1/1

ग्लौः 8.2.66, 8.3.15

[LSK] ग्लावौ 1/2 । ग्लावः 1/3 ।

ग्लौ + औ 1/2

ग्लाव् + औ 6.1.78 एचोऽयवायावः ।

ग्लौ + जस् 1/3

ग्लाव् + अस् 6.1.78 एचोऽयवायावः ।

[LSK] ग्लौभ्याम् 3/2 इत्यादि 1/1 ॥

Declension of ग्लौ (औ-पुं-1)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | ग्लौः 8.2.66, 8.3.15 | ग्लावौ 6.1.78 | ग्लावः 6.1.78, 8.2.66, 8.3.15 |
| S1 | same as above | same as above | same as above |
| 2 | ग्लावम् 6.1.78 | same as above | same as above |
| 3 | ग्लावा 6.1.78 | ग्लौभ्याम् | ग्लौभिः 8.2.66, 8.3.15 |
| 4 | ग्लावे 6.1.78 | same as above | ग्लौभ्यः 8.2.66, 8.3.15 |
| 5 | ग्लावः 6.1.78, 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | ग्लावोः 6.1.78, 8.2.66, 8.3.15 | ग्लावाम् 6.1.78 |
| 7 | ग्लावि 6.1.78 | same as above | ग्लौषु 8.3.59 |

[LSK] इति 0 अजन्तपुँल्लिङ्गाः 1/3 ॥

Thus ends the section of vowel-ending masculine words.

# अथाजन्तस्त्रीलिङ्गाः

## आ-कारान्त-स्त्रीलिङ्गः (1) रमा

There is no अदन्त word in feminine because feminine suffix टाप् will invariably come by 4.1.4 अजाद्यतष्टाप् ।.

रमते विष्णुना साकम् इति रमा (Lakṣmī) ।

रमुँ क्रीडायाम् (1A) to rejoice + अच् 3.1.134 नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ।

रम 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

रम + टाप् 4.1.4 अजाद्यतष्टाप् ।

रमा 6.1.101 अकः सवर्णे दीर्घः ।

सूत्रs applicable for आप्-ending अङ्ग

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः | 7.1.18 औङ आपः । ~ अङ्गात् शी | |
| S1 | 7.3.106 सम्बुद्धौ च । ~ एत् आपः अङ्गस्य | same as above | |
| 2 | | same as above | |
| 3 | 7.3.105 आङि चापः । ~ अङ्गस्य एत् ओसि | | |
| 4 | 7.3.113 याडापः । ~ अङ्गात् ङितः | | |
| 5 | same as above | | |
| 6 | same as above | 7.3.105 आङि चापः । ~ अङ्गस्य एत् ओसि | 7.1.54 ह्रस्वनद्यापो नुट् । ~ आमि |
| 7 | same as above | same as above | |

[LSK] रमा $^{1/1}$ ।

रमा + सुँ $^{1/1}$

रमा 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ।

आप् in this sūtra represents टाप्, डाप् and चाप्.

## [विधिसूत्रम्] 7.1.18 औङ आपः । ~ अङ्गात् शी

औ after आप्-ending अङ्ग is replaced by शी.




औङः $^{6/1}$ आपः $^{5/1}$ । ~ अङ्गात् $^{5/1}$ शी $^{1/1}$

2 words in the सूत्र; 2 words as अनुवृत्ति

- औङः 6/1 – प्रातिपदिक is औङ्; in स्थानेयोगा षष्ठी. औङ् is an old name for औ and औट् given by पूर्वाचार्य.
- आपः 5/1 – This is adjective to अङ्गात्. With तदन्तविधि, it results in "आबन्तात् अङ्गात्".
- अङ्गात् 5/1 – From अधिकारसूत्र 6.4.1 अङ्गस्य।. विभक्तिविपरिणाम takes place as प्रत्यय is to be replaced. Note that from 7.1.1 to 7.1.57, प्रत्यय is to be modified.
- शी 1/1 – From 7.1.17 जसः शी।. This is आदेश.

[LSK] आबन्तात् $^{5/1}$ अङ्गात् $^{5/1}$ परस्य $^{6/1}$ औङः $^{6/1}$ शी $^{1/1}$ स्यात् $^{III/1}$ ।

शी is the substitute in the place of औ after आप्-ending अङ्ग.

[LSK] औङ् इति $^{0}$ औकार-विभक्तेः $^{6/1}$ संज्ञा $^{1/1}$ ।

औङ् is a technical name for विभक्ति औ.

[LSK] रमे $^{1/2}$।

| | |
|---|---|
| रमा + औ $^{1/2}$ | |
| रमा + शी | 7.1.18 औङ आपः । ~ अङ्गात् शी |
| रमा + ई | 1.3.8 लशक्वतद्धिते ~ प्रत्ययस्य आदिः<br>आदेश शी is seen as प्रत्यय by 1.1.56 स्थानिवदादेशोऽनल्विधौ। |
| रमे | 6.1.87 आद्गुणः। |

[LSK] रमाः $^{1/3}$।

| | |
|---|---|
| रमा + जस् $^{1/3}$ | |
| रमास् | 6.1.102 प्रथमयोः पूर्वसवर्णः। is negated by 6.1.105 दीर्घाज्जसि च ।. |

Finally, 6.1.101 अकः सवर्णे दीर्घः।

## [विधिसूत्रम्] 7.3.106 सम्बुद्धौ च । ~ एत् आपः अङ्गस्य

When सम्बुद्धि follows, the last letter of आप्-ending अङ्ग is replaced by ए.




सम्बुद्धौ $^{7/1}$ च $^{0}$ । ~ एत् $^{1/1}$ आपः $^{6/1}$ अङ्गस्य $^{6/1}$

2 words in the सूत्र, 3 words as अनुवृत्ति

- सम्बुद्धौ 7/1 – प्रातिपदिक is सम्बुद्धि; in परसप्तमी. सम्बुद्धि is संज्ञा given to सुँ in सम्बोधन by 2.3.49 एकवचनं सम्बुद्धिः । ~ प्रथमा सम्बोधने
- च 0 – Connecting to the previous sūtra.
- एत् 1/1 – This is आदेश. तपरकरण is just for clarity.
- आपः 6/1 – From 7.3.105 आङि चापः।. Being विशेषण (adjective) to अङ्गस्य, तदन्तविधि is applied by 1.1.72 येनविधिस्तदन्तस्य।, and it results in "आबन्तस्य अङ्गस्य".
- अङ्गस्य 6/1 – From अधिकारसूत्र 6.4.1 अङ्गस्य।; in स्थानेयोगा षष्ठी.

[LSK] आपः $^{6/1}$ एकारः $^{1/1}$ स्यात् $^{III/1}$ सम्बुद्धौ $^{7/1}$ ।

ए is the substitute in the place of the last letter of आप्-ending अङ्ग, when it is followed by सम्बुद्धि, सुँ of सम्बोधन.

[LSK] "एङ्ह्रस्वात्" (6.1.69) इति $^{0}$ सम्बुद्धिलोपः $^{1/1}$ । हे रमे $^{S1/1}$ ।

रमा + सुँ $^{S1/1}$

| | |
|---|---|
| रमे + स् | 7.3.106 सम्बुद्धौ च । ~ एत् आपः अङ्गस्य |
| रमे | 6.1.69 एङ्ह्रस्वात् सम्बुद्धेः। ~ लोपः |

[LSK] हे रमे $^{S1/2}$ । हे रमाः $^{S1/3}$ । रमाम् $^{2/1}$ । रमे $^{2/2}$ । रमाः $^{2/3}$ ।

S1/2, S1/3, 2/2 are always the same as 1/2 and 1/3 in any शब्द. As for 2/1, 6.1.107 अमि पूर्वः।, and for 2/3, 6.1.102 प्रथमयोः पूर्वसवर्णः। is used. Note that 6.1.103 तस्माच्छसो नः पुंसि। does not apply here as it is feminine.

## [विधिसूत्रम्] 7.3.105 आङि चापः । ~ अङ्गस्य एत् ओसि

When टा or ओस् follows, the last letter of आप्-ending अङ्ग is replaced by ए.




आङि $^{7/1}$ च $^{0}$ आपः $^{6/1}$ । ~ अङ्गस्य $^{6/1}$ एत् $^{1/1}$ ओसि $^{7/1}$

3 words in the सूत्र, 3 words as अनुवृत्ति

- आङि 7/1 – प्रातिपदिक is आङ्; old term for टा by पूर्वाचार्यs; in परसप्तमी.
- च 0 – Connecting to the previous sūtra.
- आपः 6/1 – Being विशेषण (adjective) to अङ्गस्य, तदन्तविधि is applied by 1.1.72 येनविधिस्तदन्तस्य।, and it results in "आबन्तस्य अङ्गस्य".
- अङ्गस्य 6/1 – From अधिकारसूत्र 6.4.1 अङ्गस्य।; in स्थानेयोगा षष्ठी.
- एत् 1/1 – This is आदेश. तपरकरण is just for clarity.
- ओसि 7/1 – प्रातिपदिक is ओस्; विभक्ति for 6/2 and 7/2; in परसप्तमी.

[LSK] आङि $^{7/1}$ ओसि $^{7/1}$ च आपः $^{6/1}$ एकारः $^{1/1}$ ।

ए is the substitute in the place of the last letter of आप्-ending अङ्ग, when it is followed by टा or ओस्.

[LSK] रमया $^{3/1}$ ।

रमा + टा

| | |
|---|---|
| रमे + आ | 7.3.105 आङि चापः । ~ अङ्गस्य एत् ओसि |
| रमय् + आ | 6.1.78 एचोऽयवायावः । ~ अचि संहितायाम् |

[LSK] रमाभ्याम् $^{3/2}$ । रमाभिः $^{3/3}$ ।

## [विधिसूत्रम्] 7.3.113 याडापः । ~ अङ्गात् ङितः

When आप्-ending अङ्ग precedes, ङित्-प्रत्यय takes याट्-आगम at the beginning of it.




याट् 1/1 आपः 5/1 । ~ अङ्गात् 5/1 ङितः 6/1

2 words in the सूत्र, 2 words as अनुवृत्ति

- याट् 1/1 – This is आगम. With 1.1.46 आद्यन्तौ टकितौ।, it becomes आदि-अवयव.
- आपः 5/1 – This is adjective to अङ्गात्. With तदन्तविधि, it results in "आबन्तात् अङ्गात्".
- अङ्गात् 5/1 – From अधिकारसूत्र 6.4.1 अङ्गस्य।. विभक्तिविपरिणाम takes place as प्रत्यय is to be replaced. Note that from 7.1.1 to 7.1.57, प्रत्यय is to be modified.
- ङितः 6/1 – From 7.3.111 घेर्ङिति।. विभक्तिविपरिणाम takes place as it is the one which takes आगम; in स्थानेयोगा षष्ठी.

[LSK] आपः 5/1 ङितः 6/1 याट् 1/1 ।

याट् is आदि-अवयव-आगम for ङित् when आप्-ending अङ्ग precedes.

[LSK] वृद्धिः 1/1 । रमायै 4/1 ।

रमा + ङे

रमा + याट् + ए   7.3.113 याडापः । ~ अङ्गात् ङितः

रमा + य् + ऐ   6.1.88 वृद्धिरेचि । ~ आत् संहितायाम्

रमायै

[LSK] रमाभ्याम् 4/2, 5/2 । रमाभिः 4/3, 5/3 ।

[LSK] रमायाः 5/1, 6/1 ।

रमा + ङसिँ

रमा + याट् + अस्   7.3.113 याडापः । ~ अङ्गात् ङितः

रमा + यास्   6.1.101 अकः सवर्णे दीर्घः । ~ संहितायाम्

रमायाः   8.2.66, 8.3.15

[LSK] रमयोः $^{6/2, 7/2}$ ।

रमा + ओस्

रमे + ओस् 7.3.105 आङि चापः । ~ अङ्गस्य एत् ओसि

रमय् + ओस् 6.1.78 एचोऽयवायावः । ~ अचि संहितायाम्

रमयोः 8.2.66, 8.3.15

[LSK] रमाणाम् $^{6/3}$ ।

रमा + आम्

रमा + न् आम् 7.1.54 ह्रस्वनद्यापो नुट् । ~ आमि

रमा + नाम् 6.4.3 नामि । ~ दीर्घः (This is applied even though it is redundant, called पर्जन्यवत्)

रमाणाम् 8.4.2 अट्कुप्वाङ्नुम्व्यवायेऽपि । ~ नः णः

[LSK] रमायाम् $^{7/1}$ ।

रमा + ङि

रमा + आम् 7.3.116 ङेराम्नद्याम्नीभ्यः।

रमा + याट् आम् 7.3.113 याडापः । ~ अङ्गात् ङितः

रमा + याम् 6.1.101 अकः सवर्णे दीर्घः । ~ संहितायाम्

रमायाम्

[LSK] रमासु $^{7/3}$ ।

रमा + सुप्

रमासु

[LSK] एवम् $^{0}$ दुर्गा-अम्बिका-आदयः $^{1/3}$ ॥

In this manner, दुर्गा, अम्बिका, etc., decline.

Other आ-ending feminine words which decline in this manner are: विद्या, माया, गङ्गा, इछा, एकता, कृपा, आशङ्का, चिन्ता, जिज्ञासा, गुहा, देवता, निद्रा, निष्ठा, भाषा, etc.

## Declension of रमा (आ-स्त्री-1)

### आप्-अन्त-स्त्रीलिङ्ग-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | रमा + सुँ<br>**रमा** 6.1.68 | रमा + औ<br>रमा + शी 7.1.18<br>**रमे** 6.1.87 | रमा + जस्<br>रमास् 6.1.101<br>**रमाः** 8.2.66, 8.3.15 |
| S1 | रमा + सुँ<br>रमे + स् 7.3.106<br>**रमे** 6.1.69 | same as above | same as above |
| 2 | रमा + अम्<br>**रमाम्** 6.1.107 | same as above | रमा + शस्<br>रमास् 6.1.102<br>**रमाः** 8.2.66, 8.3.15 |
| 3 | रमा + टा<br>रमे + आ 7.3.105<br>**रमया** 6.1.78 | रमा + भ्याम्<br>**रमाभ्याम्** | रमा + भिस्<br>**रमाभिः** 8.2.66, 8.3.15 |
| 4 | रमा + ङे<br>रमा + याट् ए 7.3.113<br>रमा + यै 6.1.88<br>**हरये** | same as above | रमा + भ्यस्<br>**रमाभ्यः** 8.2.66, 8.3.15 |
| 5 | रमा + ङसिँ<br>रमा + याट् अस् 7.3.113<br>रमा + यास् 6.1.101<br>**रमायाः** 8.2.66, 8.3.15 | same as above | same as above |
| 6 | same as above | रमा + ओस्<br>रमे + ओस् 7.3.105<br>रमय् + ओस् 6.1.78<br>**रमयोः** 8.2.66, 8.3.15 | रमा + आम्<br>रमा + न् आम् 7.1.54<br>रमा + नाम् 6.4.3<br>**रमाणाम्** 8.4.2 |
| 7 | रमा + ङि<br>रमा + आम् 7.3.116<br>रमा + याट् आम् 7.3.113<br>**रमायाम्** 6.1.101 | same as above | रमा + सुप्<br>**रमासु** |

## आ-कारान्त-स्त्रीलिङ्गः (2) सर्वनाम #1 सर्वा

All अदन्त सर्वनाम words in feminine take feminine suffix टाप् by 4.1.4 अजाद्यतष्टाप् ।. They are: सर्वा, विश्वा, उभा, डतर and डतम ending words (यतरा, यतमा, etc. 6), अन्या, अन्यतरा, इतरा, त्वा, नेमा, समा, सिमा, पूर्वा, परा, अवरा, दक्षिणा, उत्तरा, अपरा, अधरा, स्वा, अन्तरा, and एका. [13]

सर्व + टाप् 4.1.4 अजाद्यतष्टाप् ।
सर्वा 6.1.101 अकः सवर्णे दीर्घः।
सर्वनामसंज्ञा for सर्व by 1.1.27 सर्वादीनि सर्वनामानि

Note that प्रातिपदिक with स्त्री-प्रत्यय is still considered to be प्रातिपदिक by परिभाषा "प्रातिपदिक-ग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्।" (mentioning of प्रातिपदिक includes the one conditioned by gender). This परिभाषा is commonly called "लिङ्गविशिष्टपरिभाषा".

Declension of सर्वा (आ-स्त्री-2 #1)

सर्वनामसंज्ञकः आप्-अन्त-स्त्रीलिङ्ग-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | | | |
| S1 | | | |
| 2 | | | |
| 3 | | | |
| 4 | सर्वस्यै 7.3.114, 6.1.88 | | |
| 5 | सर्वस्याः 7.3.114, 6.1.101 | | |
| 6 | same as above | | सर्वासाम् 7.1.52, 6.4.3 |
| 7 | सर्वस्याम् 7.3.116, 7.3.114, 6.1.101 | | |

The rest declines like रमा.

[13] As for उभय, ङीप् comes by 4.1.15, to make उभयी, which declines like नदी.

## [विधिसूत्रम्] 7.3.114 सर्वनाम्नः स्याड्ढ्रस्वश्च । ~ आपः ङितः

When आप्-ending सर्वनाम precedes, ङित्-प्रत्यय takes स्याट्-आगम at the beginning of it. And the last letter of सर्वनाम becomes ह्रस्व.




सर्वनाम्नः $^{5/1}$ स्याट् $^{1/1}$ ह्रस्वः $^{1/1}$ च $^{0}$ । ~ आपः $^{5/1}$ ङितः $^{6/1}$

4 words in the सूत्र; 2 words as अनुवृत्ति

- सर्वनाम्नः 5/1 – सर्वनामसंज्ञक word; in पूर्वपञ्चमी.
- स्याट् 1/1 – This is आगम. With 1.1.46 आद्यन्तौ टकितौ।, it becomes आदि-अवयव of ङित्-प्रत्यय.
- ह्रस्वः 1/1 – This is आदेश. With 1.1.52 अलोऽन्त्यस्य।, it replaces the last letter.
- च 0 – This चकार indicates there are two कार्यs.
- आपः 5/1 – From 7.3.113 याडापः।. This is adjective to सर्वनाम्नः. With तदन्तविधि, it results in "आबन्तात् सर्वनाम्नः".
- ङितः 6/1 – From 7.3.111 घेर्ङिति।. विभक्तिविपरिणाम takes place as it is the one which takes आगम; in स्थानेयोगा षष्ठी.

[LSK] आबन्तात् $^{5/1}$ सर्वनाम्नः $^{5/1}$ ङितः $^{6/1}$ स्याट् $^{1/1}$ स्यात् $^{1/1}$ आपः $^{6/1}$ च $^{0}$ ह्रस्वः $^{1/1}$ ।

स्याट् is आदि-अवयव-आगम for ङित् after आप्-ending सर्वनाम, and ह्रस्व is the substitute in the place of the last letter of आप्-ending सर्वनाम.

[LSK] सर्वस्यै $^{4/1}$ ।

सर्वा + ङे

| | |
|---|---|
| सर्वा + स्याट् + ए | 7.3.114 सर्वनाम्नः स्याड्ढ्रस्वश्च । ~ आपः ङितः |
| सर्व + स्याट् + ए | 7.3.114 सर्वनाम्नः स्याड्ढ्रस्वश्च । ~ आपः ङितः |
| सर्व + स्य् + ऐ | 6.1.88 वृद्धिरेचि । ~ आत् संहितायाम् |

सर्वस्यै

[LSK] सर्वस्याः 5/1, 6/1 ।

सर्वा + ङसिँ

सर्वा + स्याट् + अस् 7.3.114 सर्वनाम्नः स्याड्ढ्रस्वश्च । ~ आपः ङितः

सर्व + स्याट् + अस् 7.3.114 सर्वनाम्नः स्याड्ढ्रस्वश्च । ~ आपः ङितः

सर्व + स्यास् 6.1.101 अकः सवर्णे दीर्घः । ~ संहितायाम्

सर्वस्याः 8.2.66, 8.3.15

[LSK] सर्वासाम् 6/3 ।

सर्वा + आम्

सर्वा + स् आम् 7.1.52 आमि सर्वनाम्नः सुट् ।

सर्वा + साम् 6.4.3 नामि । ~ दीर्घः (पर्जन्यवत्)

[LSK] सर्वस्याम् 7/1 ।

सर्वा + ङि

सर्वा + आम् 7.3.116 ङेराम्नद्याम्नीभ्यः।

सर्वा + स्याट् + आम् 7.3.114 सर्वनाम्नः स्याड्ढ्रस्वश्च । ~ आपः ङितः

सर्व + स्याट् + आम् 7.3.114 सर्वनाम्नः स्याड्ढ्रस्वश्च । ~ आपः ङितः

सर्व + स्याम् 6.1.101 अकः सवर्णे दीर्घः । ~ संहितायाम्

सर्वस्याम्

[LSK] शेषम् 1/1 रमावत् 0 ॥

The rest declines like रमा.

[LSK] एवम् 0 विश्वा-आदयः 1/3 आबन्ताः 1/3 ॥

In this manner, विश्वा, etc., आ-ending सर्वनाम feminine words decline.

**<u>आ-कारान्त-स्त्रीलिङ्गः (2) सर्वनाम #2 उत्तरपूर्वा</u>**

When पूर्वा (east), उत्तरा (north), and दक्षिणा (south) come as the उत्तरपद in बहुव्रीहिसमास, सर्वनाम-संज्ञा is optional by the next sūtra.

## [संज्ञासूत्रम्] 1.1.28 विभाषा दिक्समासे बहुव्रीहौ । ~ सर्वादीनि सर्वनामानि

In बहुव्रीहि-समास, which is about direction, members of सर्वादिगण get optional सर्वनाम-संज्ञा.

विभाषा $^{1/1}$ दिक्समासे $^{7/1}$ बहुव्रीहौ $^{7/1}$ । ~ सर्वादीनि $^{1/3}$ सर्वनामानि $^{1/3}$

3 words in the सूत्र; 2 words as अनुवृत्ति

- विभाषा 1/1 – सर्वनाम-संज्ञा is optional.
- दिक्समासे 7/1 – दिशां समासः दिक्समासः (6T), तस्मिन् । Compound of direction; in अधिकरणसप्तमी.
- बहुव्रीहौ 7/1 – प्रातिपदिक is बहुव्रीहि, a type of समास; in अधिकरणसप्तमी.
- सर्वादीनि 1/3 – This is संज्ञी.
- सर्वनामानि 1/3 – This is संज्ञा.

[LSK] सर्वनामता $^{1/1}$ वा $^{0}$ ।

The status of सर्वनाम is optional.

[LSK] उत्तरपूर्वस्यै $^{4/1}$, उत्तरपूर्वायै $^{4/1}$ ।

उत्तरस्याः च पूर्वस्याः च दिशोः अन्तराला दिक् उत्तरपूर्वा ।

The direction between two directions of north and east is called उत्तरपूर्वा, north-east.

| | |
|---|---|
| उत्तरा + ङस् + पूर्वा + ङस् | 2.2.26 दिङ्नामान्यन्तराले । ~ बहुव्रीहिः समासः |
| प्रातिपदिक-संज्ञा | 1.2.46 कृत्तद्धितसमासाश्च ।~ प्रातिपदिकम् |
| उत्तरा + पूर्वा | 2.4.71 सुपो धातुप्रातिपदिकयोः । ~ लुक् |
| उत्तर + पूर्वा | (वा०) सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः । |
| उत्तरपूर्वा | |
| Optional सर्वनाम-संज्ञा | 1.1.28 विभाषा दिक्समासे बहुव्रीहौ । ~ सर्वादीनि सर्वनामानि |

Because of this sūtra, there are two forms when ङित् and आम् follow.

Declension of उत्तरपूर्वा (आ-स्त्री-2 #2)

Optional सर्वनाम-संज्ञा by being दिक्समास बहुव्रीहि

आप्-अन्त-स्त्रीलिङ्ग-शब्द्s

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | | | |
| S1 | | | |
| 2 | | | |
| 3 | | | |
| 4 | उत्तरपूर्वस्यै/उत्तरपूर्वायै | | |
| 5 | उत्तरपूर्वस्यैस्याः/उत्तरपूर्वायाः | | |
| 6 | same as above | | उत्तरपूर्वासाम्/उत्तरपूर्वाणाम् |
| 7 | उत्तरपूर्वस्याम्/उत्तरपूर्वायाम् | | |

The rest declines like रमा.

In the same manner, दक्षिणपूर्वा (south-east), पूर्वोत्तरा (east-north), पश्चिमोत्तरा (west-north), पश्चिमदक्षिणा (west-south), पूर्वदक्षिणा (east-south), etc.[14]

[14] There is no पूर्वनिपात regulation between the दिक् words.

## आ-कारान्त-स्त्रीलिङ्गः (2) सर्वनाम #3 द्वितीया

[LSK] "(वा०) तीयस्य (ङित्सु वा)" इति $^{0}$ वा $^{0}$ सर्वनामसंज्ञा $^{1/1}$ ।

By the वार्तिक "तीयस्य ङित्सु वा। For a तीय-suffix-ending word, when ङित् suffix follows, सर्वनाम-संज्ञा is optional", द्वितीया and तृतीया gain optional सर्वनाम-संज्ञा.

[LSK] द्वितीयस्यै $^{4/1}$, द्वितीयायै $^{4/1}$ ॥

When ङित् follows, there are two forms; one is with सर्वनाम-संज्ञा, and the other is without.

**Declension of द्वितीया (आ-स्त्री-2 #3)**

Optional सर्वनाम-संज्ञा when ङित्s follow

आप्-अन्त-स्त्रीलिङ्ग-शब्द

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | | | |
| S1 | | | |
| 2 | | | |
| 3 | | | |
| 4 | द्वितीयस्यै/द्वितीयायै | | |
| 5 | द्वितीयस्याः/द्वितीयायाः | | |
| 6 | same as above | | |
| 7 | द्वितीयस्याम्/द्वितीयायाम् | | |

The rest declines like रमा.

[LSK] एवम् $^{0}$ तृतीया $^{1/1}$ ॥

तृतीया declines in the same manner.

## आ-कारान्त-स्त्रीलिङ्गः (3) अम्बा

आ-ending feminine words which have the meaning of mother take ह्रस्व-आदेश in सम्बुद्धि by 7.3.107 अम्बार्थनद्योर्ह्रस्वः।.

[LSK] हे अम्ब S1/1 । हे अक्क S1/1 । हे अल्ल S1/1 ।

अम्बा + सु S1/1

अम्ब + स् 7.3.107 अम्बार्थनद्योर्ह्रस्वः। ~ अङ्गस्य सम्बुद्धौ

अम्ब 6.1.69 एङ्ह्रस्वात् सम्बुद्धेः । ~ लोपः

अक्का and अल्ला, both are in the meaning of mother, decline in the same manner.

Declension of अम्बा (आ-स्त्री-3)

अम्बार्थः आप्-अन्त-स्त्रीलिङ्ग-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | | | |
| S1 | हे अम्ब | | |
| 2 | | | |
| 3 | | | |
| 4 | | | |
| 5 | | | |
| 6 | | | |
| 7 | | | |

The rest declines like रमा.

## आ-कारान्त-स्त्रीलिङ्गः (4) जरा

जरा (old age) has its own special sūtra: 7.2.101 जराया जरसन्यतरस्याम्। ~ अचि. Because of this sūtra, when अजादि-प्रत्यय follows, there are optional forms in which अङ्ग is "जरस्". Everywhere else is like रमा.

[LSK] जरा 1/1 । जरसौ 1/2 इत्यादि 1/1 ।

जरा + औ 1/2

जरस् + औ    7.2.101 जराया जरसन्यतरस्याम्। ~ अचि

जरसौ

पक्षे जरे 1/2

Declension of जरा (आ-स्त्री-4)

जरा-शब्दः आप्-अन्त-स्त्रीलिङ्गशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | | जरसौ/जरे | जरसः/जराः |
| S1 | | same as above | same as above |
| 2 | जरसम्/जराम् | same as above | जरसः/जराः |
| 3 | जरसा/जरया | | |
| 4 | जरसे/जरायै | | |
| 5 | जरसः/जरायाः | | |
| 6 | same as above | जरसोः/जरयोः | जरसाम्/जराणाम् |
| 7 | जरसि/जरायाम् | same as above | |

The rest declines like रमा.

## आ-कारान्त-स्त्रीलिङ्गः (5) गोपा

This is a धातु-अवयव-आकारान्त word, like विश्वपा, and declines in exactly the same way as विश्वपा in पुँल्लिङ्ग. There is no स्त्रीप्रत्यय, such as टाप् by 4.1.4 अजाद्यतष्टाप् ।, applicable to this word.

गां पाति रक्षति इति गोपा ।

गो + पा रक्षणे (2P) to protect + क्विप्

[LSK] गोपाः [1/1] ।

गोपा + सुँ[1/1]

गोपाः 8.2.66, 8.3.15

With भ-संज्ञा, the last letter of अङ्ग is elided by 6.4.140 आतो धातोः। ~ भस्य लोपः.

गोपा + शस्

गोप् + अस् 6.4.140 आतो धातोः। ~ भस्य लोपः

Declension of गोपा (आ-स्त्री-5)

धातु-अवयव-आकारान्त-अनाबन्त-स्त्रीलिङ्गशब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | गोपाः | गोपौ | गोपाः |
| S1 | same as above | same as above | same as above |
| 2 | गोपाम् | same as above | गोपः 6.4.140 |
| 3 | गोपा 6.4.140 | गोपाभ्याम् | गोपाभिः |
| 4 | गोपे 6.4.140 | same as above | गोपाभ्यः |
| 5 | गोपः 6.4.140 | same as above | same as above |
| 6 | same as above | गोपोः 6.4.140 | गोपाम् 6.4.140 |
| 7 | गोपि 6.4.140 | same as above | गोपासु |

The entire declension is the same as for विश्वपा in पुँल्लिङ्ग.

<u>**इ-कारान्त-स्त्रीलिङ्गः (1) मति**</u>

मन् ज्ञाने (4A) to consider + क्तिन्　　3.3.94 स्त्रियां क्तिन् ।

म + ति　　6.4.37 अनुदात्तोपदेश-वनति-तनोत्यादीनामनुनासिक लोपो झलि क्ङिति । ~ अङ्गस्य

मति (intellect)

[LSK] मतीः 2/3 ।

मति + शस्

मत् + ई + स्　　6.1.102 प्रथमयोः पूर्वसवर्णः । ~ दीर्घः

मतीः　　8.2.66, 8.3.15

Note that 6.1.103 तस्माच्छसो नः पुंसि । is not applicable here as मति शब्द is feminine.

[LSK] मत्या 3/1 ।

मति + टा

मत्या　　6.1.77 इको यणऽचि ।

Note that 7.3.120 आङो नाऽस्त्रियाम्। ~ घेः is not applicable because it is feminine.

How does मति get घि-संज्ञा? This will become clear by the next sūtra.

## [संज्ञासूत्रम्] 1.4.6 ङिति ह्रस्वश्च । ~ यू स्त्र्याख्यौ नदी इयङुवङ्स्थानौ अस्त्री वा

When ङित्-प्रत्यय follows, optional नदी-संज्ञा is given to two types of words:

A. ई/ऊ-ending feminine (fixed-gender) word, which take इयङ्/उवङ् आदेश, excluding "स्त्री"

B. इ/उ-ending non-fixed-gender feminine words.

ङिति $^{7/1}$ ह्रस्वः $^{1/1}$ च $^{0}$ । ~ यू $^{1/2}$ स्त्र्याख्यौ $^{1/2}$ नदी $^{1/1}$ इयङुवङ्स्थानौ $^{1/2}$ अस्त्री $^{1/1}$ वा $^{0}$

3 words in the सूत्र; 6 words as अनुवृत्ति

- ङिति 7/1 – प्रातिपदिक is ङित्; represents all ङित् प्रत्यय in सुप्; in परसप्तमी.
- ह्रस्वः 1/1 – This is adjective to यू only in sentence B.
- च 0 – By this चकार, two sentences are made. See below.
- यू 1/2 – For sentence A, दीर्घ ई/ऊ are intended. ईः च ऊः च यू (ID)।;

  For sentence B, with adjective ह्रस्वः, ह्रस्व इ/उ are to be understood.
- स्त्र्याख्यौ 1/2 – स्त्रियम् आचक्षाते । (Words which) tell feminine.

  For sentence A, नित्यस्त्रीलिङ्ग words, the words which always appear in feminine.

  For sentence B, Just स्त्रीलिङ्ग words, including नित्यस्त्रीलिङ्ग words, as well as उभयलिङ्ग words, i.e., अरणि and इषु, or त्रिलिङ्ग words, i.e., पटु and मृदु.
- नदी 1/1 – This is संज्ञा; this is artificial name.
- इयङुवङ्-स्थानौ 1/2 – This is only for sentence A. प्रातिपदिकs which take इयङ्/उवङ् आदेश (by 6.4.77, etc.) such as श्री; इयङ् च उवङ् च इयङुवङौ (ID)। इयङुवङोः स्थानं ययोः तौ इयङुवङ्-स्थानौ (116B) । Words which have स्थान (= स्थानिन्s) for इयङ्/उवङ् आदेश.
- अस्त्री 1/1 – न स्त्री अस्त्री (NT)। This is to exclude प्रातिपदिक "स्त्री" from sentence A.
- वा 0 – नदी-संज्ञा is optional. The other option for group B is घि-संज्ञा by 1.4.7 शेषो घ्यसखि।.

[LSK] इयङुवङ्-स्थानौ $^{1/2}$ स्त्रीशब्दभिन्नौ $^{1/2}$ नित्यस्त्रीलिङ्गौ $^{1/2}$ ईदूतौ $^{1/2}$, ह्रस्वौ $^{1/2}$ च $^{0}$ इवर्ण-उवर्णौ $^{1/2}$ स्त्रियाम् $^{7/1}$ वा $^{0}$ नदीसंज्ञौ $^{1/2}$ स्तः $^{III/2}$ ङिति $^{7/1}$ ।

Optional नदी-संज्ञा is given to these two types of words, when ङित् follows.

| | | | | |
|---|---|---|---|---|
| A. | इयङुवङ्-स्थानौ | नित्यस्त्रीलिङ्गौ | यू (ईश्च ऊश्च) | other than the word "स्त्री" |
| B. | n/a | स्त्रीलिङ्गौ | यू (इश्च उश्च) | |

A. दीर्घ ई/ऊ-ending नित्यस्त्रीलिङ्ग words which are स्थानिन्s) for इयङ्/उवङ् आदेश, other than स्त्री

B. ह्रस्व इ/उ-ending स्त्रीलिङ्ग words

| 1.4.6 – A This gives अप्राप्त-विभाषा to words for which नदी-संज्ञा was denied by 1.4.4. |
|---|
| 1.4.6 – B If the short इ/उ-ending word is feminine, and followed by ङित्, नदी-संज्ञा. This is अपवाद to 1.4.7 शेषो घ्यसखि । |
| 1.4.7 शेषो घ्यसखि । Any short इ/उ-ending gets घि-संज्ञा. |

[LSK] मत्यै $^{4/1}$, मतये $^{4/1}$ ।

मति + ङे

Optional नदी-संज्ञा is given by 1.4.6 ङिति ह्रस्वश्च । ~ यू स्त्र्याख्यौ नदी इयङुवङ्स्थानौ अस्त्री वा

मति + आट् ए 7.3.112 आण्नद्याः। ~ ङिति

मति + ऐ 6.1.90 आटश्च । ~ वृद्धिः अचि

मत्यै 6.1.77 इको यणचि ।

When नदी-संज्ञा is not given, then it is शेष, thus 1.4.7 शेषो घ्यसखि ।

मति + ङे

मते + ए 7.3.111 घेर्ङिति । ~ गुणः

मतय् + ए 6.1.78 एचोऽयवायावः । ~ अचि

मतये

[LSK] मत्याः $^{5/1, 6/1}$ २ । मतेः $^{5/1, 6/1}$ २ ॥

मति + ङसिँ

Optional नदी-संज्ञा is given by 1.4.6 ङिति ह्रस्वश्च । ~ यू स्त्र्याख्यौ नदी इयङुवङ्स्थानौ अस्त्री वा

मति + आट् अस् 7.3.112 आण्नद्याः। ~ ङिति

मति + आस् 6.1.90 आटश्च । ~ वृद्धिः अचि

मत्याः 6.1.77 इको यणचि ।, 8.2.66, 8.3.15

When नदी-संज्ञा is not given, then it is शेष, thus 1.4.7 शेषो घ्यसखि ।

मति + ङसिँ

मते + अस् 7.3.111 घेर्ङिति । ~ गुणः

मतेस् 6.1.110 ङसिङसोश्च । ~ पूर्वरूपम्

मतेः 8.2.66, 8.3.15

## [विधिसूत्रम्] 7.3.117 इदुद्भ्याम् । ~ ङेः आम् नदीभ्याम्

ङि-प्रत्यय is replaced by आम् when it is preceded by इ/उ-ending नदी-संज्ञक word.




इदुद्भ्याम् 5/2 । ~ ङेः 6/1 आम् 1/1 नदीभ्याम् 5/2

1 word in the सूत्र; 3 words as अनुवृत्ति

- इदुद्भ्याम् 5/2 – इत् च उत् च इदुतौ (ID), ताभ्याम् इदुद्भ्याम्; in पूर्वपञ्चमी.
- ङेः 6/1 – प्रातिपदिक is ङि, सुप्-प्रत्यय in 6/1; in स्थानेयोगा षष्ठी.
- आम् 1/1 – This is आदेश; the स्थानिन् being a single letter, परिभाषा 1.1.55 अनेकाल्शित्सर्वस्य । is not required.
- नदीभ्याम् 5/2 – From 7.3.116 ङेराम्नद्याम्नीभ्यः।, only नदी is taken; वचनविपरिणाम is made in order to match with इदुद्भ्याम्; in पूर्वपञ्चमी.

[LSK] इदुद्भ्याम् 5/2 नदी-संज्ञकाभ्याम् 5/2 परस्य 6/1 ङेः 6/1 आम् 1/1 ।

आम् is the substitute in the place of ङि after इ/उ-ending word with नदी-संज्ञा.

[LSK] मत्याम् 7/1, मतौ 7/1 ।

Optional नदी-संज्ञा is given by 1.4.6 ङिति ह्रस्वश्च । ~ यू स्त्र्याख्यौ नदी इयङुवङ्स्थानौ अस्त्री वा

मति + ङि

मति + आम् 7.3.117 इदुद्भ्याम् । ~ ङेः आम् नदीभ्याम्

मति + आट् आम् 7.3.112 आण्नद्याः। ~ ङिति

मति + आम् 6.1.90 आटश्च । ~ वृद्धिः अचि

मत्याम् 6.1.77 इको यणचि ।

When नदी-संज्ञा is not given, then it is शेष, thus 1.4.7 शेषो घ्यसखि ।

मति + ङि

मत + औ 7.3.119 अच्च घेः । ~ इदुद्भ्याम् औत्

मतौ 6.1.88 वृद्धिरेचि।

In टिप्पणी १, there is a discussion on why 7.3.117 इदुद्भ्याम् । is needed while 7.3.116 ङेराम्नद्याम्नीभ्यः। itself could make "मत्याम्$^{7/1}$".

A summarized answer is this: औत्-आदेश (7.3.118) being परकार्य to आम्-आदेश (7.3.116), there would be अनिष्टसिद्धि. As a solution to this situation, 7.3.117 इदुद्भ्याम् । is started as अपवाद to 7.3.118 औत् । ~ इदुद्भ्याम्.

[LSK टिप्पणी १] ननु नदीसंज्ञा-पक्षे "मत्याम्" इति अत्र "ङेराम् नद्याम् – (7.3.116)" इति सूत्रेण एव ङेः आमि सिद्धे (सति), "इदुद्भ्याम् (7.3.117)" इति व्यर्थम् इति चेत् –

Objection: Here, "मत्याम्" in नदीसंज्ञा-पक्ष, when आम्-आदेश for ङि is accomplished by 7.3.116 ङेराम् नद्याम्… ।, this sūtra 7.3.117 इदुद्भ्याम् । is useless.

[LSK टिप्पणी १] न, "गौर्य्याम्" इत्यादौ "ङेराम् नद्याम् – (7.3.116)" इति अस्य, "सख्यौ" "पत्यौ" इति अत्र च "औत् (7.3.118)" इति अस्य चारितार्थ्येन (तुल्यबलविरोधे सति) परत्वात् (1.4.2 विप्रतिषेधे परं कार्यम्।) प्रकृते औत् इति अस्य प्रवृत्ति-आपत्तेः ।

Resolution: That is not so. For both 7.3.116 ङेराम् नद्याम्… । as in गौर्य्याम् (ई-ending with नदीसंज्ञा) and 7.3.118 औत् । ~ इदुद्भ्याम् as in सख्यौ and पत्यौ (इ-ending), there are their own scopes of operation. In our case of मति (इ-ending with नदीसंज्ञा), both sūtras are applicable. This is called विप्रतिषेध. Then औत् will be applied, because of being told later. And this is not desired.

विप्रतिषेधः

(अन्यत्रान्यत्र लब्धावकाशयोरेकत्र युगपत्प्राप्तिस्तुल्यबलविरोधः)




By 1.4.2 विप्रतिषेधे परं कार्यम्।, औत् by the परसूत्र will be taken. This is not इष्ट.

[LSK टिप्पणी १] सति तु अस्मिन् निरवकाशेन अनेन ("इदुद्भ्याम् (7.3.117)" इति सूत्रेण) "औत् (7.3.118)" इति अस्य (सूत्रस्य) बाधः इति आशयेन आह – "इदुद्भ्याम्" इति ॥

If this is the case, by separating 7.3.117 इदुद्भ्याम् । and making it अपवाद (निरवकाश), it will be the negation for 7.3.118 औत् ।. To tell this, the next sūtra "इदुद्भ्याम्" starts –

Problem:

| | | |
|---|---|---|
| 7.3.116 ङेराम्नद्याम्नीभ्यः। | ↓ मति + आम् | is ideal, but - |
| 7.3.117, 118 इदुद्भ्याम् औत् । | मति + औत् | will happen because this is परकार्यम्. |

Solution:

| |
|---|
| 7.3.116 ङेराम्नद्याम्नीभ्यः। |
| 7.3.117 इदुद्भ्याम् । |
| 7.3.118 औत् । |

By separating 7.3.117 इदुद्भ्याम् ।, it becomes अपवाद to 7.3.118 औत् ।

| | |
|---|---|
| 7.3.116 ङेराम्नद्याम्नीभ्यः। | गौर्याम् |
| 7.3.117 इदुद्भ्याम् । ~ आम् नद्याः | मत्याम् |
| 7.3.118 औत् । ~ इदुद्भयम् | सख्यौ, पत्यौ |
| 7.3.119 अच्च घेः। ~ औत् | हरौ, मतौ |

[LSK] शेषम्[1/1] हरिवत्[0] ॥

The rest declines like हरि.

Declension of **मति** (इ-स्त्री-1)

<table>
<tr><th></th><th colspan="2">एकवचनम्</th><th>द्विवचनम्</th><th>बहुवचनम्</th></tr>
<tr><td>1</td><td colspan="2">मति + सुँ<br>**मतिरुँ** 8.2.66<br>**मतिः** 8.3.15</td><td>मति + औ<br>**मती** 6.1.102</td><td>मति + जस्<br>मते + अस् 7.3.109<br>मतय् + अस् 6.1.78<br>**मतयः** 8.2.66, 8.3.15</td></tr>
<tr><td>S1</td><td colspan="2">मति + सुँ<br>मते + स् 7.3.108<br>**मते** 6.1.69</td><td>same as above</td><td>same as above</td></tr>
<tr><td>2</td><td colspan="2">मति + अम्<br>**मतिम्** 6.1.107</td><td>same as above</td><td>मति + शस्<br>मतीस् 6.1.102<br>**मतीः** 8.2.66, 8.3.15</td></tr>
<tr><td>3</td><td colspan="2">मति + टा<br>**मत्या** 6.1.77</td><td>मति + भ्याम्<br>**मतिभ्याम्**</td><td>मति + भिस्<br>**मतिभिः** 8.2.66, 8.3.15</td></tr>
<tr><td>4</td><td>मति + ङे<br>मति + आट् ए 7.3.112<br>मति + ऐ 6.1.90<br>**मत्यै** 6.1.77</td><td>मति + ङे<br>मते + ए 7.3.111<br>मतय् + ए 6.1.78<br>**मतये**</td><td>same as above</td><td>मति + भ्यस्<br>**मतिभ्यः** 8.2.66, 8.3.15</td></tr>
<tr><td>5</td><td>मति + ङसिँ<br>मति + आट् अस् 7.3.112<br>मति + आस् 6.1.90<br>मत्य् + आस् 6.1.77<br>**मत्याः** 8.2.66, 8.3.15</td><td>मति + ङसिँ<br>मते + अस् 7.3.111<br>मतेस् 6.1.110<br>**मतेः** 8.2.66, 8.3.15</td><td>same as above</td><td>same as above</td></tr>
<tr><td>6</td><td>same as above</td><td>same as above</td><td>मति + ओस्<br>मत्य् + ओस् 6.1.77<br>**मत्योः** 8.2.66, 8.3.15</td><td>मति + आम्<br>मति + न् आम् 7.1.54<br>**मतीनाम्** 6.4.3</td></tr>
<tr><td>7</td><td>मति + ङि<br>मति + आम् 7.3.117<br>मति + आट् आम् 7.3.112<br>मति + आम् 6.1.90<br>**मत्याम्** 6.1.77</td><td>मति + ङि<br>मति + औ 7.3.119<br>मत + औ 7.3.119<br>**मतौ** 6.1.88</td><td>same as above</td><td>मति + सुप्<br>**मतिषु** 8.3.59</td></tr>
</table>

When ङित् follows, optional नदी-संज्ञा by 1.4.6 ङिति ह्रस्वश्च ।.

The rest declines like हरि except for 2/3.

**<u>इ-कारान्त-स्त्रीलिङ्गः (2) त्रि</u>**

त्रि (three) is नित्यबहुवचनान्तः, always ending with plural suffix.

## [विधिसूत्रम्] 7.2.99 त्रिचतुरोः स्त्रियां तिसृचतसृ । ~ विभक्तौ

त्रि and चतुर् are replaced by तिसृ and चतसृ, respectively, in feminine, when followed by विभक्ति.




त्रि-चतुरोः $^{6/2}$ स्त्रियाम् $^{7/1}$ तिसृ-चतसृ $^{1/2}$ । ~ विभक्तौ $^{7/1}$

4 words in the सूत्र; 1 word as अनुवृत्ति

- त्रि-चतुरोः 6/2 – त्रि (three) and चतुर् (four); in स्थानेयोगा षष्ठी.
- स्त्रियाम् 7/1 – Feminine; in विषयसप्तमी.
- तिसृ-चतसृ 1/2– This is आदेश. By 1.3.10 यथासङ्ख्यमनुदेशः समानाम्।, तिसृ replaces त्रि, and चतसृ replaces चतुर्. By परिभाषा 1.1.55 अनेकाल्शित्सर्वस्य ।, the entire स्थानिन् is replaced.[15]
- विभक्तौ 7/2 – From 7.2.84 अष्टन आ विभक्तौ; in परसप्तमी.

[LSK] स्त्रीलिङ्गयोः $^{6/2}$ एतौ $^{1/2}$ स्तः $^{III/2}$ विभक्तौ $^{7/1}$ ।

तिसृ and चतसृ are the substitutes in the place of त्रि and चतुर् in feminine, when विभक्ति follows.

त्रि + जस् $^{1/3}$

तिसृ + अस् 7.2.99 त्रिचतुरोः स्त्रियां तिसृचतसृ । ~ विभक्तौ

When तिसृ and चतसृ are followed by vowel-beginning suffix, the next sūtra is applied.

---

[15] After ऋदन्त-आदेश, feminine suffix ङीप् is applicable by 4.1.5 ऋन्नेभ्यो ङीप् । but negated by 4.1.10 न षट्-स्वस्रादिभ्यः। since तिसृ and चतसृ are counted in स्वसृ-आदिगण.

## [विधिसूत्रम्] 7.2.100 अचि र ऋतः । ~ तिसृचतस्रोः

ऋ of तिसृ and चतसृ is replaced by र् when अच् follows.




अचि 7/1 रः 1/1 ऋतः 6/1 । ~ तिसृचतस्रोः 6/2

3 words in the सूत्र; 1 word as अनुवृत्ति

- अचि 7/1 – In परसप्तमी.
- रः 1/1– रेफ is the आदेश. अ after रेफ is उच्चारणार्थ.
- ऋतः 6/1 – प्रातिपदिक is ऋत्, a short ऋ; in स्थानेयोगा षष्ठी.
- तिसृ-चतस्रोः 6/2 – From the previous sūtra; with विभक्तिविपरिणाम; in सम्बन्धे षष्ठी to ऋतः.

[LSK] "तिसृचतसृ" एतयोः 6/2 ऋकारस्य 6/1 रेफ-आदेशः 1/1 स्यात् III/1 अचि 7/1 ।

रेफ is the substitute in the place of ऋ of तिसृचतसृ, when अच् follows.

[LSK] गुण-दीर्घ-उत्त्वानाम् 6/3 अपवादः 1/1 ।

This is अपवाद for गुण, दीर्घ, and उत्त्व[16].

[LSK] तिस्रः 1/3 । तिस्रः 2/3 ।

त्रि + जस्

तिसृ + अस्  7.2.99 त्रिचतुरोः स्त्रियां तिसृचतसृ । ~ विभक्तौ

तिस्र् + अस्  7.2.100 अचि र ऋतः । ~ तिसृचतस्रोः

---

[16] गुणः – When जस् follows, this sūtra negates गुण told by 7.3.109 जसि च । ~ ह्रस्वस्य गुणः and 7.3.110 ऋतो ङिसर्वनामस्थानयोः। ~ गुण.

दीर्घः – When शस् follows, it this sūtra negates दीर्घ told by 6.1.102 प्रथमयोः पूर्वसवर्णः।.

उत् – When तिसृ and चतसृ are compounded as उत्तरपद and become गौण, and ङसिँ/ङस् follows, this sūtra negates उत् told by 6.1.111 ऋत उत्। ~ ङसिङसोश्च. For example, प्रियाः तिस्रः यस्य सः प्रियसा। प्रातिपदिक is प्रियत्रि. When विभक्ति follows, स्त्रीत्व is गौण, तिसृ-आदेश is applied by 7.2.99 त्रिचतुरोः स्त्रियां तिसृचतसृ । ~ विभक्तौ. In the case of प्रियत्रि + ङसिँ, it becomes प्रियतिसृ + ङसिँ and 6.1.111 ऋत उत्। is प्राप्त. By the अपवाद 7.2.100 अचि र ऋतः ।, the final form is प्रियतिस्रः.

[LSK] तिसृभिः $^{3/3}$ । तिसृभ्यः $^{4/3}$ । तिसृभ्यः $^{5/3}$ ।

[LSK] आमि $^{7/1}$ नुट् $^{1/1}$ ।

त्रि + आम्

तिसृ + आम्     7.2.99 त्रिचतुरोः स्त्रियां तिसृचतसृ । ~ विभक्तौ

Here, विप्रतिषेध happens between 7.1.54 ह्रस्वनद्यापो नुट्। and 7.2.100 अचि र ऋतः। ~ तिसृचतस्रोः. By (वा०) नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन ।, नुट् takes precedence.

तिसृ + नाम्     7.1.54 ह्रस्वनद्यापो नुट्।

Now, 6.4.3 नामि is applicable. The next sūtra is निषेध for that.

## [निषेधसूत्रम्] 6.4.4 न तिसृचतसृ । ~ नामि दीर्घः

दीर्घ does not happen for तिसृ and चतसृ even when नाम् follows.




न $^{0}$ तिसृचतसृ $^{6/2}$ । ~ नामि $^{7/1}$ दीर्घः $^{1/1}$

2 words in the सूत्र; 2 words as अनुवृत्ति

- न 0 – Negation to दीर्घ.
- तिसृचतसृ 6/2 – विभक्ति is लुप्त by 7.1.39 सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः.
- नामि 7/1 – In परसप्तमी.
- दीर्घः 1/1– This is the आदेश, which is negated by न.

[LSK] (तिसृचतसृ) एतयोः $^{6/2}$ नामि $^{7/1}$ दीर्घः $^{1/1}$ न $^{0}$ ।

दीर्घः does not take place for तिसृचतसृ, even when नाम् follows.

[LSK] तिसृणाम् $^{6/3}$ ।

त्रि + आम्

तिसृ + आम्     7.2.99 त्रिचतुरोः स्त्रियां तिसृचतसृ । ~ विभक्तौ

तिसृ + नाम्     7.1.54 ह्रस्वनद्यापो नुट्। with (वा०) नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन ।

दीर्घ is prohibited by 6.4.4 न तिसृचतसृ । ~ नामि दीर्घः

तिसृ + णाम्        (वा०) ऋवर्णान्नस्य णत्वं वाच्यम् ।

[LSK] तिसृषु$^{7/3}$ ।

त्रि + सु

तिसृ + सु        7.2.99 त्रिचतुरोः स्त्रियां तिसृचतसृ । ~ विभक्तौ

तिसृ + षु        8.3.59 आदेशप्रत्यययोः। ~ मूर्धन्यः इण्कोः

Declension of त्रि (इ-स्त्री-2)

नित्यबहुवचनान्तः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | | | तिस्रः 7.2.99, 7.2.100 |
| S1 | | | |
| 2 | | | तिस्रः 7.2.99, 7.2.100 |
| 3 | | | तिसृभिः 7.2.99 |
| 4 | | | तिसृभ्यः 7.2.99 |
| 5 | | | same as above |
| 6 | | | तिसृणाम् 7.2.99, 7.1.54, 6.4.4 |
| 7 | | | तिसृषु 7.2.99, 8.3.59 |

तिसृ-आदेश is only in feminine.

## इ-कारान्त-स्त्रीलिङ्गः (3) द्वि

द्वि (two) is सर्वनाम, and counted in त्यदादि-गण. This is नित्य-द्विवचनान्त-शब्द.

Because of 7.2.102 त्यदादीनामः ।~ विभक्तौ, it becomes अ-ending, and 4.1.4 अजाद्यतष्टाप् । ~ स्त्रियाम् gives टाप् for अ-ending. Then, the प्रातिपदिक becomes द्वा. Being नित्य-द्विवचनान्त-शब्द and there is no सर्वनामसंज्ञानिमित्तक-कार्य in dual, it declines like रमा.

[LSK] द्वे $^{1/2}$ । द्वे $^{2/2}$ । द्वाभ्याम् $^{3/2}$ । द्वाभ्याम् $^{4/2}$ । द्वाभ्याम् $^{5/2}$ । द्वयोः $^{6/2}$ । द्वयोः $^{7/2}$ ।

द्वि + औ

| | |
|---|---|
| द्व + औ | 7.2.102 त्यदादीनामः । ~ विभक्तौ |
| द्व टाप् + औ | 4.1.4 अजाद्यतष्टाप् । ~ स्त्रियाम् |
| द्वा + औ | 6.1.101 अकः सवर्णे दीर्घः । |
| द्वा + शी | 7.1.18 औङ आपः । ~ शी |
| द्वा + ई | 1.1.56 स्थानिवदादेशोऽनल्विधौ।, 1.3.8 लशक्वतद्धिते ।, 1.3.9 तस्य लोपः। |
| द्वे | 6.1.87 आद्गुणः । ~ अचि |

Declension of द्वि (इ-स्त्री-3)

नित्यद्विवचनान्त-सर्वनाम-संज्ञक-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | | द्वे | |
| S1 | | | |
| 2 | | द्वे | |
| 3 | | द्वाभ्याम् | |
| 4 | | same as above | |
| 5 | | same as above | |
| 6 | | द्वयोः | |
| 7 | | same as above | |

Since there is no सर्वनामसंज्ञानिमित्तक-कार्य in dual, it declines like रमा.

There is no सम्बोधन for द्वि.

## ई-कारान्त-स्त्रीलिङ्गः (1) गौरी

गौर (white) + ङीष्   4.1.41 षिद्-गौरादिभ्यश्च । ~ ङीष्

गौर् + ई   6.4.148 यस्येति च । ~ भस्य लोपः

गौरी (Pārvatī)

[LSK] गौरी 1/1 ।

गौरी + सुँ

गौरी   6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः

[LSK] गौर्य्यौ 1/2 ।

गौरी + औ

गौर्य् + औ   6.1.77 इको यणचि ।, after negating 6.1.102 प्रथमयोः पूर्वसवर्णः। by 6.1.105 दीर्घाज्जसि च ।

गौर्य्य् + औ   8.4.46 अचो रहाभ्यां द्वे ।

गौर्य्यौ

[LSK] गौर्य्यौ 1/3 ।

गौरी + जस्

गौर्य् + अस्   6.1.77 इको यणचि ।, after negating 6.1.102 प्रथमयोः पूर्वसवर्णः। by 6.1.105 दीर्घाज्जसि च ।

गौर्य्य् + अस्   8.4.46 अचो रहाभ्यां द्वे ।

गौर्य्यः   8.2.66, 8.3.15

[LSK] हे गौरि S1/1 ।

गौरी + सुँ

गौरि + स्   7.3.107 अम्बार्थनद्योर्ह्रस्वः ।

गौरि   6.1.69 एङ्ह्रस्वात् सम्बुद्धेः । ~ लोपः

[LSK] गौर्य्यै 4/1 इत्यादि 1/1 ।

गौरी + ङे

गौरि + आट् ए   7.3.112 आण्नद्याः। ~ ङिति

गौरि + ऐ   6.1.90 आटश्च । ~ अचि वृद्धिः

गौर्यै   6.1.77 इको यणचि ।

गौर्य्यै   8.4.46 अचो रहाभ्यां द्वे ।

## Declension of गौरी (ई-स्त्री-1)

### नदी-संज्ञक-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | गौरी | गौर्य्यौ | गौर्य्यः |
| S1 | हे गौरि | same as above | same as above |
| 2 | गौरीम् | same as above | गौरीः |
| 3 | गौर्य्या | गौरीभ्याम् | गौरीभिः |
| 4 | गौर्य्यै | same as above | गौरीभ्यः |
| 5 | गौर्य्याः | same as above | same as above |
| 6 | same as above | गौर्य्योः | गौरीणाम् |
| 7 | गौर्य्याम् | same as above | गौरीषु |

The entire declension is like बहुश्रेयसी, except for 2/3.

[LSK] एवम्$^{0}$ नद्यादयः$^{1/3}$ ॥

नदी-संज्ञक प्रातिपदिकs such as नदी, सरस्वती, ब्राह्मणी, कुमारी, नारी, सारङ्गी, etc., decline in the same manner.

## ई-कारान्त-स्त्रीलिङ्गः (2) लक्ष्मी

लक्ष् + ई (उ० 3.160) लक्षेर्मुट् च । ~ ई
लक्ष् + म् ई (उ० 3.160) लक्षेर्मुट् च । ~ ई
लक्ष्मी

[LSK] लक्ष्मीः $^{1/1}$ । शेषम् $^{1/1}$ गौरीवत् $^{0}$ ।

Since the ई is from उणादि-प्रत्यय, not feminine suffix ङी (ङीप्, ङीष्, ङीन्), 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः does not apply in 1/1. This is the only difference from गौरी.

[LSK] एवम् $^{0}$ तरी-तन्त्र्यादयः $^{1/3}$ ।

तरी, तन्त्री, etc., decline in the same manner.

There are nine such feminine words, which do not end with ङी-प्रत्यय, thus they are not subject to 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः.

अवी-तन्त्री-स्तरी-लक्ष्मी-तरी-धी-ह्री-श्रियां भियः ।
अङ्यन्तत्वात् स्त्रियामेषां न सुलोपः कदाचनः ॥

Declension of लक्ष्मी (ई-स्त्री-2)

अङी-अन्त-नदी-संज्ञक-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | लक्ष्मीः | | |
| S1 | | | |
| 2 | | | |
| 3 | | | |
| 4 | | | |
| 5 | | | |
| 6 | | | |
| 7 | | | |

The rest is like गौरी.

## ई-कारान्त-स्त्रीलिङ्गः (3) स्त्री

ष्ट्यै शब्दसङ्घातयोः

स्त्यै 6.1.64 धात्वादेः षः सः ।, (प०) निमित्तापाये नैमित्तिकस्याप्यपायः।[17]

स्त्यै + ड्रट् (उ० 4.167) स्त्यायतेर्ड्रट्

स्त्य् + र (वा०) डित्वसामर्थ्यादभस्यापि टेर्लोपः।

स्त् + र 6.1.66 लोपो व्योर्वलि ।

प्रातिपदिकसंज्ञा 1.2.46 कृत्तद्धितसमासाश्च । ~ प्रातिपदिकम्

स्त्र + ङीप् 4.1.15 टिड्-ढाणञ्-द्वयसज्-दघ्नञ्-मात्रच्-तयप्-ठक्-ठञ्-कञ्-करपः । ~ ङीप्

स्त्र् + ई 6.4.148 यस्येति च । ~ भस्य लोपः

स्त्री

नदीसंज्ञा 1.4.3 यू स्त्र्याख्यौ नदी ।

[LSK] स्त्री $^{1/1}$ ।

स्त्री + सुँ

स्त्री 6.1.68 हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् । ~ लोपः.

[LSK] हे स्त्रि $^{S1/1}$ ।

स्त्री + सुँ

स्त्रि + स् 7.3.107 अम्बार्थनद्योर्ह्रस्वः ।

स्त्रि 6.1.69 एङ्ह्रस्वात् सम्बुद्धेः । ~ लोपः

स्त्री + औ

Here, पूर्वसवर्णदीर्घ is negated by 6.1.105 दीर्घाज्जसि च।, and 6.1.77 इको यणचि is प्राप्त. Then the next sūtra comes.

---

[17] निमित्तस्य (of the cause) अपायः (removal) निमित्तापायः, तस्मिन् सति नैमित्तिकस्य (of the effect) अपि अपायः ।
When the cause is removed, the effect is also gone.

## [विधिसूत्रम्] 6.4.79 स्त्रियाः । ~ इयङ् अचि

स्त्री, when followed by अच्, is changed into स्त्रिय्. (The last letter is replaced by इय्.)




स्त्रियाः 6/1 । ~ इयङ् 1/1 अचि 7/1

1 word in the सूत्र; 2 words as अनुवृत्ति

- स्त्रियाः 6/1 – प्रातिपदिक "स्त्री"; in स्थानेयोगा षष्ठी.
- इयङ् 1/1 – Being ङित्, स्थानिन् is decided as the last single letter by 1.1.53 ङिच्च.
- अचि 7/1 – In परसप्तमी. In this अङ्ग-अधिकार, "अङ्गस्य" implies "प्रत्यये". By तदादिविधि, "अजादि-प्रत्यये" is understood.

[LSK] अस्य 6/1 इयङ् 1/1 स्यात् III/1 अजादौ 7/1 प्रत्यये 7/1 परे 7/1।

इयङ् is the substitute in the place of the last letter of स्त्री-शब्द, when a suffix beginning with अच् follows.

[LSK] स्त्रियौ 1/2 ।

स्त्री + औ

स्त्रिय् + औ 6.4.79 स्त्रियाः । ~ इयङ् अचि, after negating 6.1.102 by 6.1.105, and 6.1.77 by this sūtra.

[LSK] स्त्रियः 1/3 ।

स्त्री + जस्

स्त्रिय् + अस् 6.4.79 स्त्रियाः । ~ इयङ् अचि

स्त्रियः 8.2.66, 8.315

In 2.1, 6.1.107 अमि पूर्वः । is प्राप्त. Then the next sūtra comes.

स्त्री + अम्

## [विधिसूत्रम्] 6.4.80 वाऽम्शसोः । ~ स्त्रियाः इयङ्

स्त्री, when followed by अम् or शस्, is optionally changed into स्त्रिय्. (The last letter is replaced by इय्.)




वा $^{0}$ अम्-शसोः $^{7/2}$ । ~ स्त्रियाः $^{6/1}$ इयङ् $^{1/1}$

2 words in the सूत्र; 2 words as अनुवृत्ति

- वा 0 – इयङ्-आदेश is optional.
- अम्-शसोः 7/2 – अम् of 2/1 and शस् of 2/3; in परसप्तमी.
- स्त्रियाः 6/1 – प्रातिपदिक "स्त्री"; in स्थानेयोगा षष्ठी.
- इयङ् 1/1 – Being ङित्, स्थानिन् is decided as the last single letter by 1.1.53 ङिच्च.

[LSK] अमि $^{7/1}$ शसि $^{7/1}$ च $^{0}$ स्त्रियाः $^{6/1}$ इयङ् $^{1/1}$ वा $^{0}$ स्यात् $^{III/1}$ ।

इयङ् is optionally the substitute in the place of the last letter of स्त्री, when अम् or शस् follows.

[LSK] स्त्रियम् $^{2/1}$, स्त्रीम् $^{2/1}$ ।

स्त्री + अम्

स्त्रिय् + अम्  6.4.80 वाऽम्शसोः । ~ इयङ् स्त्रियाः

स्त्रियम्

पक्षे

स्त्रीम्  6.1.107 अमि पूर्वः।

[LSK] स्त्रियः $^{2/3}$, स्त्रीः $^{2/3}$ ।

स्त्री + शस्

स्त्रिय् + अस्  6.4.80 वाऽम्शसोः । ~ इयङ् स्त्रियाः

पक्षे

स्त्रीस्  6.1.102 प्रथमयोः पूर्वसवर्णः। ~ दीर्घः

स्त्रीः

[LSK] स्त्रिया 3/1 ।

स्त्री + टा

स्त्रिय् + आ 6.4.79 स्त्रियाः । ~ इयङ् अचि

Even though स्त्री-शब्द is इयङ्-स्थान, the word which has स्थान for इयङ्-आदेश, नदी-संज्ञा does not become optional when ङित् follows by 1.4.6 ङिति ह्रस्वश्च । because this option excludes स्त्री-शब्द.

[LSK] स्त्रियै 4/1 । स्त्रियाः 5/1, 6/1 ।

स्त्री + ङे

स्त्री + आट् + ए 7.3.112 आण्नद्याः।

स्त्री + ऐ 6.1.90 आटश्च ।

स्त्रिय् + ऐ 6.4.79 स्त्रियाः । ~ इयङ् अचि

[LSK] परत्वात् 5/1 नुट् 1/1 । स्त्रीणाम् 6/3 ।

When आम् follows, विप्रतिषेध between 6.4.79 स्त्रियाः । ~ इयङ् अचि and 7.1.54 ह्रस्वनद्यापो नुट् । happens. Being पर, नुट्-आगम is taken. After नुट्-आगम, the प्रत्यय is not अजादि anymore, thus इयङ् will not come back.

स्त्री + आम्

स्त्री + न् + आम् 7.1.54 ह्रस्वनद्यापो नुट् ।

स्त्री + नाम् 6.4.3 नामि । (पर्जन्यवत्)

स्त्रीणाम् 8.4.2 अट्कुप्वाङ्नुम्व्यवायेऽपि । ~ नः णः

[LSK] स्त्रीषु 7/3 ॥

## Declension of स्त्री (ई-स्त्री-3)

### नदी-संज्ञक-ईकारान्त-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1 | स्त्री + सुँ<br>**स्त्री** 6.1.68 | स्त्री + औ<br>**स्त्रियौ** <u>6.4.79</u> | स्त्री + जस्<br>स्त्रियस् <u>6.4.79</u><br>**स्त्रियः** 8.2.66, 8.3.15 |
| S1 | स्त्री + सुँ<br>स्त्रि + स् 7.3.107<br>**स्त्रि** 6.1.69 | same as above | same as above |
| 2 | स्त्री + अम्<br>**स्त्रियम्** <u>6.4.80</u><br>**स्त्रीम्** 6.1.107 | same as above | स्त्री + शस्<br>**स्त्रियः** <u>6.4.80</u>, 8.2.66, 8.3.15<br>**स्त्रीः** 6.1.102, 8.2.66, 8.3.15 |
| 3 | स्त्री + टा<br>**स्त्रिया** <u>6.4.79</u> | स्त्री + भ्याम्<br>**स्त्रीभ्याम्** | स्त्री + भिस्<br>**स्त्रीभिः** 8.2.66, 8.3.15 |
| 4 | स्त्री + ङे<br>स्त्री + आट् ए 7.3.112<br>स्त्री + ऐ 6.1.90<br>**स्त्रियै** <u>6.4.79</u> | same as above | स्त्री + भ्यस्<br>**स्त्रीभ्यः** 8.2.66, 8.3.15 |
| 5 | स्त्री + ङसिँ<br>स्त्री + आट् अस् 7.3.112<br>स्त्री + आस् 6.1.90<br>स्त्रियास् <u>6.4.79</u><br>**स्त्रियाः** 8.2.66, 8.3.15 | same as above | same as above |
